No. of Printed Pages/Questions: 6 / 18

# O. P. JINDAL SCHOOL, SAVITRI NAGAR

## Half Yearly Examination (2019 – 2020)

**Class / Section: IX** **MM: 80**
**Subject: Sanskrit** **Time: Hrs. 3.00**
Name: ____________ Roll No.:__________

***(Fifteen Minutes Extra will be given for reading the Question Paper.)***
***General Instructions: All questions are compulsory***

निर्देशाः1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

| | | |
|---|---|---|
| खण्ड क | पठित अवबोधनम् | (10 अङ्काः) |
| खण्ड ख | रचनात्मकं कार्यम् | (15 अङ्काः) |
| खण्ड ग | अनुप्रयुक्तव्याकरणम् | (25 अङ्काः) |
| खण्ड घ | पठित–अवबोधनम् | (30 अङ्काः) |

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

## (खण्ड–क) पठित अवबोधनम्

**प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

सावित्रीबाईफुले महाराष्ट्रस्य प्रथमा महिला शिक्षिका आसीत्। यदा सा नववर्षीया तदा तस्याः विवाहः त्रयोदशवर्षीयः ज्योतिबाफुले महोदयेन सह अभवत्। सः स्त्रीशिक्षायाः प्रबल समर्थकः आसीत्। अतः सावित्र्या मनसि स्थिता अध्ययनस्य अभिलाषा पूर्णा जाता। 1848 तमे वर्षे पुणेनगरे सावित्री ज्योतिबा महोदयेन सह कन्यानाम् कृते प्रदेशस्य प्रथमं विद्यालयं आरभत्। अध्यापनाय यदा सा पुस्तकानि आदाय चलति स्म तदा तस्याः उपरि धूलिम् कश्चित् च प्रस्तरखण्डान् क्षिपति स्म। परं स्वनिश्चये दृढ़ा सा अध्यापने संलग्ना अभवत्। प्लेगप्रसारकाले सेवारता सा स्वयमेव असाध्य रोगेण ग्रस्ता। 1897 तमे वर्षे पंचत्वं गता। महिलोत्थानाय संघर्षरतायै सावित्र्यै नमः।

**I एकपदेन उत्तरत –** **(1X2=2)**

i सावित्र्याः मनसि कस्य अभिलाषा आसीत् ?

ii सावित्री केषां मुखरं विरोधम् अकरोत् ?

**II पूर्णवाक्येन उत्तरत–** **(2X2=4)**

i यदा सावित्री अध्यापनाय अगच्छत् तदा किम् अभवत् ?

ii सा कथं पंचत्वं गता ?

**III अस्य अनुच्छेस्य कृते समुचितं शीर्षकं लिखत।** **(1X1=1)**

(इस अनुच्छेद का उचित शीर्षक लिखिए)

**IV प्रदत्त विकल्पेभ्यः उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'स्वनिश्चये दृढ़ा सा अध्यापने संलग्ना अभवत्' अत्र अभवत् इति क्रियापदस्य कर्तृपदम् किम् ?

ii 'प्रदाय' इति पदस्य किं विलोमपदमं गद्यांशे प्रयुक्तम् ?

iii 'सः स्त्रीशिक्षायाः प्रबल–समर्थकः आसीत्' अत्र 'सः' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

## (खण्ड–ख) रचनात्मकं कार्यम्

**प्र0 2** भवान् सार्थकः। भवतां विद्यालये संस्कृत नाटकं आयोज्यते। स्व मित्रं समर्थम् प्रति लिखिते अस्मिन् पत्रे मंजूषातः रिक्तस्थानानि पूरयत पत्रं च पुनः उत्तरपुस्तिकायां लिखत– **(½X10=5)**

(आप सार्थक हैं। आपके विद्यालय में आयोजित संस्कृत नाटक का विवरण देते हुए मित्र समर्थ को पत्र लिखिए।)

नवयुग विद्यालयः (1)———

दिनांक ——————

प्रिय मित्र (2)————

(3)————————। अत्र अवगतं कुशलं। आशासे भवान् अपि कुशली। यथा त्वमं जानासि गत सप्ताहे मम विद्यालये सांस्कृतिक—उत्सवः सम्पन्नः। अस्मिन् उत्सवे संस्कृतपरिषदः (4)———— पाठ्यपुस्तकस्य 'कवयामि वयामि यामि' इति नाटकस्य (5)———— कृतम्। तस्मिन् नाटके मया 'भोजस्य' अभिनयः कृत। कुविन्दस्य अभिनयं तु वैभवेन कृतम्। तस्य मुखात् श्लोकगायनम् (6)———— सर्वे उपस्थिताः दर्शकाः भावविभोराः जाताः करतलध्वनिभिः च तस्य उत्साहवर्धनम् (7)———। कार्यक्रमस्य अन्तेऽपि मुख्यातिथिमहोदयेन संस्कृत नाटकस्य भूरि—भूरि (8)———— कृता।

तव विद्यालये संस्कृतोत्सवः कदा भविष्यति, अवश्य सूचय। मातृ—पितृचरणेषु (9)———— प्रणामा।


भवतः मित्रम्

(10)————

| |
|---|
| श्रुत्वा, मम, सार्थकः, समर्थः !, प्रशंसा, अकुर्वन्, छात्रैः, सस्नेहम् नमः, मंचनम्, दिल्लीतः, |

**प्र03 मंजूषायाम् प्रदत्त शब्दानाम् सहायतया चित्रं दृष्ट्वा पंच वाक्यानि संस्कृतेन लिखत—(1X5=5)**

| |
|---|
| रक्तदुर्गम्, दिल्याम्, प्रातः, स्वतंत्रतादिवसः, प्रधानमंत्रिणः, शाहजहाँ, ऐतिहासिकम्, अरचयत्, ध्वजारोहणम्, सर्वे, विशिष्टातिथयः, आरक्षितजनाः, प्रांगणम्, सगर्वम्। |



**प्र0 4 अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादः क्रियताम्— (1x5=5)**

**क)** वह समाचार पत्र पढ़ेगी।

**ख)** मैं दूध पीकर जाता हूँ।

**ग)** यह देवदत्त की पुस्तक है।

**घ)** विराट क्रिकेट खेलता है।

**ङ)** पवन चावल नहीं खाता।

## (खण्ड—ग) अनुप्रयुक्तव्याकरणम्

**प्र0 5 अधोलिखित वाक्येषु स्थूलपदानाम् समुचितं संधि—विच्छेदं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत— (1X4=4)**

**i** **चंद्र + उदयः** निशायाम् भवति।

(क) चंद्रोदयः (ख) चंद्रादयः

(ग) चंद्रउदय (घ) चंद्रेदयः

ii आश्रमे **उभौ + अपि** अतिथि तिष्ठतः।

(क) उभावपि (ख) उभौअपी

(ग) उभेअपि (घ) उभोअपि

iii स्वाध्यायाभ्यसनं **चैव** तपः उच्यते।

(क) च + ऐव (ख) च + एव

(ग) च + ईव (घ) चै + व

iv **महर्षि** सर्वत्र पूज्यः।

(क) महा + अर्षि (ख) मह + अरषि

(ग) महा + ऋषिः (घ) महो + ऋषि

**प्र0 6 उचित शब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** **(1x4=4)**

i यमुना ------ पवित्रतमा नदी अस्ति।

(क) नदीषु (ख) नदी

(ग) नदीम् (घ) नद्यौ

ii ----- नाम रमा अस्ति ?

(क) कस्य (ख) केन

(ग) कस्याः (घ) कया

Iii तेन ----- सह रामः अगच्छत्।

(क) बालकः (ख) बालकम्

(ग) बालकेन (घ) बालकस्य

iv ----- सह चटकाः उत्पतन्ति।

(क) चटकै (ख) चटकाभिः

(ग) चटकायाः (घ) चटकाम्

**प्र0 7 उचित धातुरूपाणि चित्वा रिक्तस्थानानि पूरयत–** **(1x4=4)**

i मोहनः प्रातःकाले ------।

(क) पठेयम् (ख) पठेत्

(ग) पठेताम् (घ) पठेयुः

ii श्वः रविवासरः -------।

(क) भविष्यामि (ख) भविष्यसि

(ग) भविष्यथ (घ) भविष्यति

iii त्वम् अतिथीन् ----------।

(क) सेवते (ख) सेवसे

(ग) सेवेथे (घ) सेवध्वे

iv सा कुत्र ----------?

(क) गच्छामि (ख) गच्छसि

(ग) गच्छति (घ) गच्छन्ति

प्र0 8 अधोलिखितवाक्येषु प्रदत्त विकल्पेभ्यः उचितम् पदम् चित्वा लिखत– (1X4=4)

i ------- नेत्राभ्याम् पश्यन्ति।

(क) नरः (ख) नरौ

(ग) नराय (घ) नराः

ii छात्राः -------- लिखन्ति

(क) कलमः (ख) कलमाः

(ग) कलमेन (घ) कलमाय

iii कपयः ------ उपरि क्रीडन्ति।

(क) वृक्षे (ख) वृक्षात्

(ग) वृक्षम् (घ) वृक्षस्य

iv खगाः --------- वसन्ति।

(क) नीड़ेषु (ख) नीड़ं

(ग) नीड़ात् (घ) नीड़स्य

**प्र0 9 प्रदत्त विकल्पेभ्यः उचितानि प्रत्ययाः उत्तराणि चित्वा लिखत– (1X4=4)**

i वयं भोजनालयात् किंचित् **खाद् + क्त्वा** गृहं प्रति गच्छामः।

(क) खादित्वा (ख) खदित्वा

(ग) खिदित्वा (घ) खेदित्वा

ii जनाः पुस्तकानि **क्रेतुम्** पुस्तक प्रदर्शन्याम् आगच्छन्ति।

(क) क्र + तुमुन् (ख) कृ + तुमुन्

(ग) क्री + तुमुन् (घ) क्रय + तुमुन्

iii मातरम् **प्र + नम् + ल्यप्** सः विद्यालयम् आगच्छति।

(क) प्रनम् (ख) प्रणम्

(ग) प्रणम्य (घ) प्रणयम्

iv दुग्धम् **पीत्वा** सा विद्यालयं गच्छति।

(क) पे + त्वा (ख) पी + तु

(ग) पी + त्वा (घ) पा + क्त्वा

**प्र0 10 अधोलिखित वाक्येषु उचित संख्यारूपैः रिक्तस्थानं पूरयत– (1X3=3)**

i वृक्षात् -------- फलानि पतन्ति। (पंचन्)

ii ------- ग्रहाः भवन्ति। (नवन्)

iii कालिदासस्य ------- नाटकानि सन्ति। (त्रि)

**प्र0 11 निम्नलिखितेषु पदेषु प्रयुक्तान उपसर्गान् लिखत– (½X4=2)**

अवकाशः, निष्कण्टकः, अधिग्रहणम्, प्रहारः

## (खण्ड–घ) पठित अवबोधनम्

**प्र0 12 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत–**

अथ पित्रा 'तथा' इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुम् उपगम्य उवाच– "देव ! त्वया अस्मतपूर्वेषाम् अभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय। यथा पृथ्वीमदरिद्रां पश्यामि, तथा करोतु देव" इति। एवंवादिनि जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात् तरोरुदभूत्। क्षणेन च स कल्पतरुः दिवं समुत्पत्य भुवि तथा वसूनि अवर्षत् यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम्।

I एक पदेन उत्तरत— (½X2=1)

i जीमूतवाहनः कस्य समीपं गच्छति स्म ?

ii कस्य यशः सर्वत्र प्रथितम् ?

II पूर्णवाक्येन उत्तरत— (1X1=1)

i जीमूतवाहनः कल्पतरुम् किं अकथयत् ?

III उचितम् उत्तरम् चित्वा लिखत— (1X3=3)

i 'धनानि' इत्यर्थे किं पदं प्रयुक्तम् ?

(अ) दिवम् (ब) कल्पतरु

(स) वसूनि (द) भुवि

ii 'अभीष्टा' इति पदे कः सन्धि–विच्छेदः वर्तते ?

iii 'समुत्पत्य' अस्मिन् पदे कः प्रत्ययः वर्तते ?

**प्र0 13 अधोलिखितम् श्लोकम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमतीं च पश्चात्।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायैव मैत्री खलुसज्जनानाम्।।

I एकपदेन उत्तरत— (½X2=1)

i खलु सज्जनानाम् मैत्री कीदृशी भवति ?

ii दिनस्य पूर्वार्द्धे छाया कीदृशी भवति ?

II पूर्णवाक्येन उत्तरत— (1X1=1)

i दिनस्य परार्द्धे छाया कीदृशी भवति ?

III उचितम् उत्तरम् चित्वा लिखत— (1X3=3)

i 'छायैव' पदस्य कः सन्धिच्छेदः वर्तते ?

ii 'पुरा' इत्यस्य पदस्य कः विपरीतार्थकः वर्तते ?

iii 'आरम्भ' अस्मिन् पदे कः उपसर्गः वर्तते ?

**प्र0 14 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

**अभिमन्यु** अये ! अयमपरः कः विभात्युमावेषमिवाश्रितो हरः ।

**वृहन्नला** आर्य, अभिभाषणकौतूहलं मे महत् वाचालयत्वेनमार्यः।

**भीमसेनः** (अपवार्य) बाढम् (प्रकाशम्) अभिमन्यो !

**अभिमन्युः** अभमन्युर्नाम ?

**भीमसेनः** रुष्यत्येष मया त्वमेवैनमभिभाषय।

**वृहन्नला** अभिमन्यो !

**अभिमन्युः** कथं कथम्। अभिमन्युर्नामाहम्। भोः ! किमत्र विराटनगरे क्षत्रियवंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवंश गतः अतएव तिरस्क्रियते।

**वृहन्नला** अभिमन्यो ! सुखमास्ते ते जननी ?

I एकपदेन उत्तरत— (½X2=1)

i कया अभिमन्यु रुष्यति ?

ii कुत्र नीचैः अपि नामभिः अभिभाष्यन्ते ?

II पूर्णवाक्येन उत्तरत— (1X1=1)

i अभिमन्युः वृहन्नलां दृष्ट्वा किं कथयति ?

**III** **उचितम् उत्तरम् चित्वा लिखत–** **(1X3=3)**

i 'शोभते' इत्यर्थे किं पदं प्रयुक्तम् ?

ii 'त्वया' इति पदस्य विलोम पदं किम् ?

iii 'अभिभाषय' इति क्रियापदस्य कर्तृपदम् किम् ?

**प्र0 15 अधोलिखितेषु वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(1X4=4)**

i कल्पतरुः 'पृथिव्यां' धनानि अवर्षत्।

ii वृक्षाः फलम् न खादन्ति।

iii स्वादूनि भक्ष्यकवालानि ते दास्यामि।

iv कुक्कुरः मानुषाणां मित्रम् अस्ति।

**प्र0 16 निम्नलिखित श्लोकयोः अन्वयं मंजूषातः पूरयत–** **(½X4=2)**

गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः।।

**अन्वय** पुरुषैः सदा हि ——— एव प्रयत्नः ———। यतः गुणयुक्तः——— अपि, अगुणै युक्तै ——— समः ना (अपितु श्रेष्ठः भवति)

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्माद् तदेव वक्तव्यं वचने का दरिद्रता।। **(½X4=2)**

**अन्वयः –** सर्वे ——— प्रियवाक्यप्रदानेन——— तस्मात् सर्वैः ——— वक्तव्यं वचने का———।

| ईश्वरैः, दरिद्रः, कर्तव्यः, गुणेषु, दरिद्रता, तदेव, तुष्यन्ति, जन्तवः |
|---|

**प्र0 17 अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत–** **(½X8=4)**

(निम्नलिखित घटनाक्रम को उचित क्रमानुसार पुनः लिखिए।)

**i)** सः चिन्तयामास विरमन्तु इते वराकाः पुस्तकदासाः।

**ii)** सन्तु एते निष्कुटवासिनः एव प्राणिनः मम वयस्या इति।

**iii)** तन्द्रालु बालः लज्जया तेषां दृष्टिपथमपि परिहन्नेकाकी किमपि उद्यानं प्रविवेश।

**iv)** भ्रान्तः कश्चन् बालः पाठशालागमनवेलायां क्रीडितुम् निर्जगाम।

**v)** यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः बभुवुः।

**vi)** अथ स पुष्पोद्यानं व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडाहेतुराह्वयत्।

**vii)** किन्तु तेन सह केलिभिः कालं क्षेप्तुम् तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्।

**viii)** अहम् पुनरात्मानं विनोदयिष्यामि।

**प्र0 18 अधोलिखितपदेषु पर्यायः पदेन सह मेलनम् कुरुत–** **(1X3=3)**

| | |
|---|---|
| वित्तम् | आचरणम् |
| वृत्तम् | वारिवाहाः |
| मेघाः | धनम् |

**———00———**